# Kailasavarnanam 7

# કૈલાસવર્ણનમ્ ૭

## Document Information

Text title : Kailasavarnanam 7

File name : kailAsavarNanam7.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 27 - kailAsavarNane devIpUjAstutikathanam | 27-41||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસવર્ણનમ્ ૭

(કૈલાસશૈલે દેવીમહાસૌધવર્ણનમ્ ૭)

સ્કન્દઃ -
તત્ર દેવ્યા મહાસૌધે નવરત્નવિચિત્રિતમ્ ॥ ૨૭॥

ગર્ભાગારં મહેશસ્ય રમ્યન્દેવીશ્વરસ્ય ચ ।
પ્રાકારગોપુરોપેતં રત્નતોરણમણ્ડિતમ્ ॥ ૨૮॥

માણિક્યમુકુરોદ્દામરુદ્રક્રીડાવૃષૈર્યુતમ્ ।
સુરમ્યરત્નકલશપતાકાભ્રાજિશેખરમ્ ॥ ૨૯॥

તત્ર લિઙ્ગં સુધાપૂરધવલીકૃતદિઙ્મુખમ્ ।
કાકોદરફણાભ્રાજિબિલ્વાલઙ્કૃતમસ્તકમ્ ॥ ૩૦॥

સુધાધામકખણ્ડોમ્રરત્ન(દ્રત્ન)ગોલકભૂષિતમ્ ।
તદ્વૈ દેવીશ્વરં લિઙ્ગં પૂજયત્યમ્બિકા સદા ॥ ૩૧॥

સુધાસાગરનીરોત્થકલશૈર્નવરત્નજૈઃ ।
પઞ્ચામૃતમહાધારાગન્ધમોદૈશ્ચ નીરકૈઃ ॥ ૩૨॥

યક્ષકર્દમજાલેપવેષ્ટનામ્બરસુન્દરમ્ ।
બિલ્વચમ્પકધત્તૂરરત્નપઙ્કજમાલિની ॥ ૩૩॥

જાતીસરાવલીશોભિલિઙ્ગમૌલિમનોહરમ્ ।
તક્કોલાગરુજોધૂપધૂમૈશ્શિવા તદા ॥ ૩૪॥

કુરુવિન્દમણિજ્યોતિદીપૈરુદ્યોતિતાન્તરમ્ ।
સુપુણ્ડરીકમાલાભિર્નવનીલોત્પલસ્રજા ॥ ૩૫॥

હરિન્મણિનિભૈર્બિલ્વૈસ્સહસ્રૈઃ પૂજયેચ્છિવા ।
ભક્ષ્યભોજ્યવરાન્નાનાં રાશિભિશ્શૈલકન્યકા ॥ ૩૬॥

તામ્બૂલૈઃ ખદિરાસારસ્વર્ણકર્પૂરખણ્ડજૈઃ ।

નીરાજનૈર્મુખરિતશઙ્ખકાહલમદ્દલૈઃ ॥ ૩૭॥

વીણાવેણુજમડ્ડૂત્થદુન્દુભ્યાદિસુનિસ્વનૈઃ ।
રુદ્રાણીનર્તનૈશ્ચૈવ યોગિનીગણવાદનૈઃ ॥ ૩૮॥

ત્રિકાલં પૂજયત્યેવં ત્રિપુણ્ડ્રલલિતાલકા ।
રુદ્રાક્ષકીલિતાપારમુક્તામણિસરોજ્વલા ॥ ૩૯॥

સોમશૌચે વાસસી સાપ્યરજે ધારિણી શિવા ।
સંસ્તુવન્તી મહાલિઙ્ગં દેવીશ્વરમતન્દ્રિતા
કૃતાઞ્જલિપુટા દેવી પ્રકૃષ્ટગ્ચાષ્ટવિગ્રહમ્ ॥ ૪૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલે દેવીમહાસૌધવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૨૭ - કૈલાસવર્ણને દેવીપૂજાસ્તુતિકથનમ્ । ૨૭-૪૧॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 27 - kailAsavarNane devIpUjAstutikathanam . 27-41..

Notes:
Skanda સ્કન્દ describes about the grand residence of Devī દેવી Mount Kailāsa કૈલાસ શૈલ; and mentions about the Devīśvara Śivaliṅga દેવીશ્વર શિવલિઙ્ગ that She worships there.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasavarnanam 7*
pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*